# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – ओक्टोबर् - २०१९

| | | |
|---|---|---|
| कक्षा – आचार्य-१ (SEM-1) | प्रश्नपत्रम् – ५ | गुणाः - ७० |
| विषयः - सर्वदर्शनम्(ऐच्छिकम्) | C.E - 4.1.1 | समयः – ८ तः ११ |
| दिनाङ्कः – १४/१०/२०१९ | ग्रन्थः – पञ्चदशी (४-६ प्रकरणानि) | |

### प्रथमान्वितिः (युनिट-१)

**प्रश्नः -१ द्वयोरेकस्य श्लोकस्य व्याख्यां यथाग्रन्थं यच्छत।** ०५

(१) मायां तु प्रकृतिं विद्यान्मयिनं तु महेश्वरम्।
स मायी सृजतीत्याहुः श्वेताश्वतरशाखिनः॥

(२) मर्त्यान्नमेकं देवान्ने द्वे पश्वन्नं चतुर्थकम्।
अन्यत्रितयमात्मार्थमन्नानां विनियोजनम्॥

**प्रश्नः -२ द्वयोरेकस्य निबन्धात्मिका व्याख्या कार्या ।** १०

(१) जीवेश्वरयोः जगदुत्पत्त्विषये सम्बन्धं यथाग्रन्थं व्याख्यात।

(२) 'जीवसृष्टद्वैतप्रपञ्चं' यथाग्रन्थं व्याख्यात ।

### द्वितीयान्वितिः (युनिट-२)

**प्रश्नः -३ एकस्य श्लोकस्य व्याख्यां यथाग्रन्थं लिखत ।** ०५

(१) परिपूर्णः परात्माऽस्मिन्देहे विद्याधिकारिणि।
बुद्धेः साक्षितया स्थित्वा स्फुरन्नहमितीर्यते॥

(२) येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च।
स्वाद्वस्वादू विजानाति तत्प्रज्ञानमुदीरितम्॥

**प्रश्नः -४ एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** १०

(१) महावाक्यार्थविचारं यथाग्रन्थम् उपपादयत।

(२) जीवकूटस्थयोर्विवेचनं यथाग्रन्थं प्रतिपादयत।

### तृतीयान्वितिः (युनिट-३)

**प्रश्नः -५ एकस्य श्लोकस्य व्याख्यां यथाग्रन्थं लिखत ।** ०५

(१) नासदासीद्विभातत्वान्नो सदासीच्च बाधनात्।
विद्यादृष्ट्या श्रुतं तुच्छं तस्य नित्यनिवृत्तितः॥

(२) चित्सन्निधौ प्रवृत्तायाः प्रकृतेर्हि नियामकम्।
श्रुतावसङ्गता तद्वदसङ्गो हीत्यतः स्फुटा॥

**प्रश्नः -६ एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत। १०**

(१) ईश्वरस्वरूपं यथाग्रन्थं विचारयत।

(२) आत्मनः चिदचिदादिविशेषरूपविषयं यथाग्रन्थं विवेचयत।

## चतुर्थ्यन्वितिः (युनिट-४)

**प्रश्नः -७ एकस्य श्लोकस्य व्याख्यां यथाग्रन्थं लिखत। ०५**

(१) "न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥" स्पष्टयत।

(२) ईश्वरसृष्टजगत्सृष्टिं व्याख्यात।

प्रश्नः -८ **एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत। १०**

(१) जीवब्रह्मणोरैक्यं यथाग्रन्थं विवेचयत।

(२) तत्त्वज्ञानस्य फलं यथाग्रन्थं विचारयत।

प्रश्नः -९ **दश प्रश्नानामुत्तराणि एकवाक्येन यच्छन्तु। १०**

(१) माया का अस्ति?

(२) कः जीव उच्यते?

(३) द्वैतं बन्धहेतुर्न वा?

(४) पञ्चदशी ग्रन्थकर्ता कः?

(५) जीवद्वैतं कतिविधम्? के च ते भेदा: ?

(६) ऐतरेयारण्यकोक्तमहावाक्यं किमस्ति?

(७) मनुष्याणां बन्धमोक्षयोः कारणं किम्?

(८) अथर्ववेदान्तर्गतमहावाक्यं किम्?

(९) दुर्घटत्वं कस्य स्वाभाविको गुणः?

(१०) ईश्वरः सर्वभूतेषु कुत्र तिष्ठति?

(११) कः जलाकाशः?

(१२) कस्य संसारः?

(१३) ब्रह्मशब्देन कः उच्यते?

(१४) जीवः कूटस्थं कदा विविनक्ति?

(१५) अविद्या कतिविधा? के च ते?

***

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा ओक्टोम्बर् - २०१९

| | | |
|---|---|---|
| कक्षा – आचार्य-१ (SEM-1) | प्रश्नपत्रम् – ५ | गुणाः - ७० |
| विषयः - सर्वदर्शनम्(ऐच्छिकम्) | C.E - 4.1.1 | समयः - |
| दिनाङ्कः - | ग्रन्थः – पञ्चदशी (४-६ प्रकरणानि) | |

### प्रश्नः - ७
### समाधानानि

१. प्रकृतिरस्ति।

२. चैतन्यं यदधिष्ठानं लिङ्गदेहश्च यः पुनः।
चिच्छाया लिङ्गदेहस्था तत्सङ्गो जीव उच्यते॥

३. बन्धहेतुरेव।

४. श्रीविद्यारण्यमुनिः।

५. द्विविधम्, शास्त्रीयमशास्त्रीयमिति।

६. प्रज्ञानं ब्रह्म।

७. मन एव।

८. अयमात्मा ब्रह्म।

९. मायायाः स्वाभाविको गुणः।

१०. हृद्देशे तिष्ठति।

११. घटावच्छिन्नखे नीरं यत्तत्र प्रतिबिम्बितः।
साभ्रनक्षत्र आकाशो जलाकाश उदीर्यते॥

१२. आत्माभासस्य जीवस्यैव संसारः।

१३. स्वतः पूर्णः परात्माऽत्र ब्रह्मशब्देन वर्णितः।

१४. न कदाचन।

१५. द्विविधा, विक्षेपावृतिभेदेन।